**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहि:स्थ**

**परीक्षा: जानेवारी – २०२३**

**सत्र १ ले**

**विषय: स्वप्नवासवदत्त (22E312)**

---

**दिनांक: ०५/०१/२०२३** **गुण : १००** **वेळ : स. १०.०० ते १.००**

---

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १.अ) अनुवादं करुत।** **(१६)**

क) विस्रब्धा हरिणाश्चरन्त्यचकिता देशागतप्रत्यया वृक्षा: पुष्पफलै: समृद्धविटपा: सर्वे दयारक्षिता:।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो नि:संदिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रय:।।

ख) किं वक्ष्यतीति हृदयं परिशङ्कितं मे कन्या मयापहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघात: पुत्र: पितुर्जनितरोष इवास्मि भीत:।।

ग) शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।
रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति।।

घ) ऋज्वायतां च विरलां च नतोन्नतां च सप्तर्षिवंशकुटिलां च निवर्तनेषु।
निर्मुच्यमानभुजगोदरनिर्मलस्य सीमामिवाम्बरतलस्य विभज्यमानाम्।।

**ब) १) सन्धिविग्रहं कुरुत।** **(०५)**

१. सर्वतस्तपोवनगतो जन: २. किमत्रेच्छतीति ३. नैवार्थैर्नापि
४. चोपनीतमङ्के ५. वचनेनानुगृहीतास्मि

**२) समासविग्रहं कृत्वा समासस्य नाम लिखत।** **(०५)**

१. अनुपरता २. मुखमाधुर्यम् ३. पुष्पफलानि
४. शून्यहृदया ५. निवृत्तरोगा

**प्र. २. ससन्दर्भं स्पष्टीकुरुत । (कानिचन त्रीणि वाक्यानि)** **(१८)**

अ) सुपरिपालनीय: खलु मन्न्यास:।

ब) आर्यपुत्रोऽपि नाम परकीय: संवृत्त:।

क) एतावता भणितमार्यपुत्रेण।

ड) वासवदतास्वजनो मे स्वजन इति।

**प्र.३. संक्षिप्ता: टिप्पणीः लिखत। (काश्चन चतस्र:)** **(१६)**

अ) नान्दीश्लोक: ब) पद्मावती क) द्विकेन्द्रितं दृश्यम्
ड) नाटकस्य शीर्षकम् इ) यौगन्धरायणः

**प्र. ४. सविस्तरं परिच्छेदौ लिखत।** **(२०)**

अ) स्वप्नवासवदत्तस्य वैशिष्ट्यानि ब) स्वप्नप्रसङ्गः

**प्र. ५. भाससमस्याया: निरूपणं कुरुत।** **(२०)**

------------